च्येषु ॥ ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते। क। वेदे। यद्वो रेवती रेवत्यं तदूष। यन्मे नरः श्रुत्यं ब्रह्म चक्र[1]। यत्रा नश्चक्रा जरसं तनूनामिति[2] ॥

किं पुनः शब्दस्य ज्ञाने धर्म आहोस्वित्प्रयोगे। कश्चात्र विशेषः।

## ज्ञाने धर्म इति चेत्तथाधर्मः ॥ ६ ॥

ज्ञाने धर्म इति चेत्तथाधर्मः प्राप्नोति। यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति। यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञाने ऽप्यधर्मः। अथवा भूयानधर्मः प्राप्नोति। भूयांसोऽपशब्दा अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा। गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः ॥

## आचारे नियमः ॥ ७ ॥

आचारे पुनर्ऋषिर्नियमं वेदयते। तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुरिति ॥ अस्तु तर्हि प्रयोगे।

## प्रयोगे सर्वलोकस्य ॥ ८ ॥

यदि प्रयोगे धर्मः सर्वो लोकोऽभ्युदयेन युज्येत। कश्चेदानीं भवतो मत्सरो यदि सर्वो लोकोऽभ्युदयेन युज्येत। न खलु कश्चिन्मत्सरः प्रयत्नानर्थक्यं तु भवति। फलवता च नाम प्रयत्नेन भवितव्यं न च प्रयत्नः फलाद् व्यतिरेच्यः। ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते त एव साधीयोऽभ्युदयेन योक्ष्यन्ते। व्यतिरेकोऽपि वै लक्ष्यते। दृश्यन्ते हि कृतप्रयत्नाश्चाप्रवीणा अकृतप्रयत्नाश्च प्रवीणाः। तत्र फलव्यतिरेकोऽपि स्यात् ॥ एवं तर्हि नापि ज्ञान एव धर्मो नापि प्रयोग एव। किं तर्हि।

## शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ॥ ९ ॥

शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। तत्तुल्यं वेदशब्देन। वेदशब्दा अप्येवमभिवदन्ति। योऽग्निष्टोमेन यजते य उ चैनमेवं वेद[3]। योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद[4] ॥ अपर आह। तत्तुल्यं वेदशब्देनेति। यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्त्येवं यः शास्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति ॥ अथवा पुनरस्तु ज्ञान एव धर्म इति। ननु चोक्तं ज्ञाने धर्म इति

---

1. ऋ. सं. 1. 165. 11. 2. ऋ. सं. 1. 89. 9. 3. cf योऽग्निष्टोमेन यजमानोथ सर्वस्तोमेन यजेत। तै. सं. ७।१।३।१. 4. तै. ब्रा. ३।११।८।६. L. 2 Ben. वेदे। तद्यथा। सप्तास्ये रेवती रेवदूष ( ऋ. सं. 4. 51. 4 ), यद्वा रेवती रेवत्यां तमूष। यन्मे नरः etc.